# શ્રીસુબ્રહ્મણ્યકવચસ્તોત્રમ્

shrI subrahmaNyakavachastotraM

sanskritdocuments.org

March 13, 2019

# shrI subrahmaNyakavachastotraM

# શ્રીસુબ્રહ્મણ્યકવચસ્તોત્રમ્

## Sanskrit Document Information

Text title : shrii subrahmaNyakavachastotraM

File name : subrakavacha.itx

Category : kavacha, subrahmanya

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Description-comments : kumaaratantre kaushikaprashne mahaa saMhitaayaam

Latest update : March 15, 2006

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 13, 2019

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યકવચસ્તોત્રમ્

અસ્ય શ્રી સુબ્રહ્મણ્યકવચસ્તોત્રમહામન્ત્રસ્ય બ્રહ્મ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રી સુબ્રહ્મણ્યો દેવતા । ૐ નમ ઇતિ બીજમ્ ।
ભગવત ઇતિ શક્તિઃ । સુબ્રહ્મણ્યાયેતિ કીલકમ્ ।
સુબ્રહ્મણ્યપ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

કરન્યાસઃ ॥

સાં અંગુષ્ઠાભ્યાં નમઃ
સીં તર્જનીભ્યાં નમઃ
સૂં મધ્યમાભ્યાં નમઃ
સૈં અનામિકાભ્યાં નમઃ
સૌં કનિષ્ઠિકાભ્યાં નમઃ
સઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગ ન્યાસઃ ॥

સાં હૃદયાય નમઃ
સીં શિરસે સ્વાહા
સૂં શિખાયૈ વષટ્
સૈં કવચાય હું
સૌં નેત્રત્રયાય વૌષટ્
સઃ અસ્ત્રાય ફટ્
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ॥

સિન્દૂરારુણમિન્દુકાન્તિવદનં કેયૂરહારાદિભિઃ
દિવ્યૈરાભરણૈર્વિભૂષિતતનું સ્વર્ગાદિસૌખ્યપ્રદમ્ ।
અંભોજાભયશક્તિકુક્કુટધરં રક્તાંગરાગોજ્વલં

સુબ્રહ્મણ્યમુપાસ્મહે પ્રણમતાં ભીતિપ્રણાશોદ્યતમ્ ॥

સુબ્રહ્મણ્યોઽગ્રતઃ પાતુ સેનાનીઃ પાતુ પૃષ્ઠતઃ ।
ગુહો માં દક્ષિણે પાતુ વહ્નિજં પાતુ વામતઃ ॥ ૧॥

શિરઃ પાતુ મહાસેનઃ સ્કન્દો રક્ષેલ્લલાટકમ્ ।
નેત્રો મે દ્વાદશાક્ષશ્ચ શ્રોત્રે રક્ષતુ વિશ્વભૃત્ ॥ ૨॥

મુખં મે ષણ્મુખઃ પાતુ નાસિકાં શઙ્કરાત્મજઃ ।
ઓષ્ઠૌ વલ્લીપતિઃ પાતુ જિહ્વાં પાતુ ષડાનનઃ ॥ ૩॥

દેવસેનાપતિર્દન્તાન્ ચુબુકં બહુલાત્મજઃ । var બહૂલોદ્ભવઃ
કણ્ઠં નારકજિત્ પાતુ બાહુ દ્વાદશબાહુમાન્ ॥ ૪॥

var તારકજિત્પાતુ બાહુદ્વાદશ બાહુકઃ

હસ્તૌ શક્તિધરઃ પાતુ વક્ષઃ પાતુ શરોદ્ભવઃ ।
હૃદયં વહ્નિભૂઃ પાતુ કુક્ષિં પાત્વમ્બિકાસુતઃ ॥ ૫॥

નાભિં શંભુસુતઃ પાતુ કટિં પાતુ હરાત્મજઃ ।
ઊરુ પાતુ ગજારૂઢો જાનૂ મે જાહ્નવીસુતઃ ॥ ૬॥

જઙ્ઘે વિશાખો મે પાતુ પાદૌ મે શિખિવાહનઃ ।
સર્વાણ્યઙ્ગાનિભૂતેશઃ સર્વધાતુંશ્ચપાવકિઃ ॥ ૭॥

var સર્વધાતંશ્ચ તાવકિઃ

સન્ધ્યાકાલે નિશીથિન્યાં દિવાપ્રાતર્જલેઽગ્નિષુ ।
દુર્ગમે ચ મહારણ્યે રાજદ્વારે મહાભયે ॥ ૮॥

તુમુલેરણ્યમધ્યે ચ સર્વદુષ્ટમૃગાદિષુ ।
ચોરાદિસાધ્વસેભેદ્યે જ્વરાદિવ્યાધિ પીડને ॥ ૯॥

દુષ્ટગ્રહાદિભીતૌ ચ દુર્નિમિત્તાદિ ભીષણે ।
અસ્ત્રશસ્ત્રનિપાતે ચ પાતુ માં ક્રૌઞ્ચરન્ધકૃત્ ॥ ૧૦॥

યઃ સુબ્રહ્મણ્યકવચં ઇષ્ટસિદ્ધિપ્રદં પઠેત્ ।
તસ્ય તાપત્રયં નાસ્તિ સત્યં સત્યં વદામ્યહમ્ ॥ ૧૧॥

ધર્માર્થી લભતે ધર્મમર્થાર્થી ચાર્થમાપ્નુયાત્ ।
કામાર્થિ લભતે કામં મોક્ષાર્થીમોક્ષમાપ્નુયાત્ ॥ ૧૨॥

યત્ર યત્ર જપેદ્ભક્ત્યા તત્ર સન્નિહિતો ગુહઃ ।
પૂજાપ્રતિષ્ઠાકાલે ચ જપકાલે પઠેદિદમ્ ॥ ૧૩॥

તેષામેવફલાવાપ્તિઃ મહાપાતકનાશનમ્ ।
યઃ પઠેચ્છૃણુયાદ્ભક્ત્યા નિત્યંદેવસ્ય સન્નિધૌ ॥ ૧૪॥

॥ ઇતિ કુમારતન્ત્રે કૌશિકપ્રશ્ને મહા સંહિતાયાં
સુબ્રહ્મણ્યકવચં સમાપ્તઃ ॥

Encoded and proofread by antaratma at Safe-mail.net
Corrected by Vinayak Nagaraj vinayak at econ.lse.ac.uk

*shrI subrahmaNyakavachastotraM*
pdf was typeset on March 13, 2019

Please send corrections to *sanskrit@cheerful.com*